# वैयाकरणसिद्धान्तकौमुदी
# अथ कारकप्रकरणम्
# प्रथमा-विभक्तिः

---

1. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रेप्रथमा [ 2-3-46 ]

नियतोपस्थितिकः प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये परिमाण मात्रे संख्यामात्रे च प्रथमा स्यात्। उच्चैः। नीचैः। कृष्णः। श्रीः। ज्ञानम्। अलिङ्गा नियतलिङ्गाश्च प्रातिपदिकार्थमात्र इत्यस्योदाहरणम्। अनियतलिङ्गास्तु लिङ्गमात्राधिकयस्य। तटः - तटी - तटम्। परिमाणमात्रे -द्रोणोव्रीहिः। द्रोणरूपं यत् परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः। प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम्, प्रत्ययार्थस्तु परिच्छेद्य-परिच्छेदक भावेन व्रीहौ विशेषणमिति विवेकः। वचनं संख्या। एकः। द्वौ। बहवः। इहोक्तार्थत्वात विभक्तेरप्राप्तौ वचनम्।

---

**वृत्तिः** प्रातिपदिकार्थमात्रेलिङ्गमात्राधिक्ये परिमाणमात्रे संख्यामात्रे च प्रथमा भवति।

**सूत्रार्थ :** प्रातिपदिकार्थ मात्र में, लिङ्ग मात्र की अधिकता में, परिमाण मात्र में, तथा वचनमात्र (संख्या मात्र) अर्थ में प्रथमा विभक्ति होती है।

**भाववोधिनी संस्कृत-व्याख्या**

किं तावत कारकत्वमस्यप्रश्नस्योत्तरमस्ति - क्रियाजनकत्वं कारकत्वम्, क्रियान्वयित्वं वा कारकत्वम्। अर्थात यस्य क्रियया सह अन्वयः स्यात् सः भवति कारकः। क्रियायाः अन्वयः- सम्बन्धः क्रियान्वयः, यः क्रियया अन्वेति (सम्बन्धं प्राप्नोति) तत् कारकमित्युच्यते इति फलितार्थः। यथा -

1. छात्रः पठति। अत्र छात्रस्य पठन् क्रियायाम् अन्वयः, अतः छात्रः कर्तृकारकम्।
2. पुष्पं स्पृशति। अत्र पुष्पस्य स्पर्शनक्रियायाम् अन्वयः, अतः पुष्पमिति कर्मकारकम्।
3. कलमेन लिखति। अत्र कलमित्यस्य लेखन क्रियायाम् अन्वयः। अतः कलमिति करणकारकम्।
4. ब्राह्मणाय गां ददाति। अत्र ब्राह्मणेति पदस्य दानक्रियायाम् अन्वयः। अतः ब्राह्मणेति पदं सम्प्रदानकारकम्।
5. वृक्षात् पतति। अत्र वृक्षेति पदस्य पतन क्रियायाम् अन्वयः। अतः वृक्षः अपादान कारकम्।
6. आसने उपविशति। अत्र आसनेति पदस्य उपवेशन क्रियायाम् अन्वयः। अतः आसनमिति अधिकरणकारकम्।

अत्रेदमवधेयं यत् कर्तृकारकस्यैव क्रियायां साक्षात् अन्वयो भवति, अन्यानि कारकाणि तु परम्परया क्रियायाम् अन्वयं प्राप्नुवन्ति।

पाणिनीयव्याकरणानुसारं षट् कारकाणि भवन्ति -

**कर्ता कर्म च करणञ्च सम्प्रदानं तथैव च।**
**अपादानाधिकरणमित्याहुः कारकाणि षट्॥**

अतः उपर्युक्तानां कर्ता कर्मादिकारकाणां चिन्हानि एव विभक्तयः सन्ति। एवं विभक्तीनामर्थनिरूपणादस्य प्रकरणस्याभिधानं विभक्त्यर्थप्रकरणमपि वर्तते। विभक्तिभिः कारकार्थाः अभिव्यक्ताः भवन्ति अत एवास्य प्रकरणस्य नाम कारकप्रकरणमपि वरीवर्तते।

## प्रातिपदिकार्थविवेचनम्

पदं पदं प्रति इति विग्रहे वीप्सायाम् अव्ययीभावसमासानन्तरं प्रतिपदम् इति पदस्य सिद्धिर्जायते। प्रतिपदे भवं इत्यस्मिन् अर्थे ठक् प्रत्ययानन्तरं प्रातिपदिक इति पदस्य निष्पत्ति र्भवति। प्रातिपदिकस्यैवार्थः प्रातिपदिकार्थः। यावत् शब्देन सह सुप् आहोस्वित् तिङ् विभक्तीनां प्रयोगो न भवति तावत् तस्मिन् शब्दे पदत्वं नैव समायाति। 'अपदं न प्रयुञ्जीत'' एष नियमः। अत एव 'सुप्तिङ्न्तं पदम्''इति सूत्रेण सुबन्तस्य तिङ्न्तस्य च पदसंज्ञाविधीयते।

प्रातिपदिकस्यार्थं प्रकटयन् सिद्धान्तकौमुदीकारः श्रीमद् भट्टोजिदीक्षितः कथयति- नियतोपस्थितिकः प्रातिपदिकार्थः। अर्थात् यस्मिन् प्रातिपदिके उच्चारिते सति यस्यार्थस्य नियमेन उपस्थिति भवति, सः प्रातिपदिकार्थः। नियत अर्थस्य बोध एव प्रातिपदिकार्थः भवति। यथा - 'रामः' इत्यत्र रामपदोत्तर 'सु' प्रत्ययः रामपदस्य नियतार्थमेव द्योतयति।

अतः संज्ञासर्वनामविशेषणाव्ययपदेषु च अर्थमात्रं बोधयितुं प्रथमा विभक्तेर्विधान-मावश्यकम्।

**मात्रशब्दस्येति**

'द्वन्द्वान्ते द्वन्द्वादौ च श्रूयमाणं पदं प्रत्येकमभिसम्बद्धयते' इति नियमवलात् मात्रशब्दस्य प्रत्येकं योगः। अतः प्रातिपदिकार्थमात्रे लिङ्गमात्राधिकये परिमाणमात्रे वचन (संख्या) मात्रे च प्रथमा भवतीति सूत्रार्थः।

उच्चैः, नीचैः, इत्यादयः अलिङ्गाः [लिङ्गरहिताः]अव्ययाः, कृष्णः, श्रीः, ज्ञानम्, इत्यादयः नियतलिङ्गाः शब्दाः प्रातिपदिकार्थमात्रस्यैवोदाहरणम्, अर्थादत्र प्रातिपदिकार्थ मात्रे प्रथमाविभक्ति र्भवति। येषां शब्दानां लिङ्गं निश्चितं नास्ति एवं भूताः अनियतलिङ्गाः शब्दाः लिङ्गमात्राधिक्यस्योदाहरणानि सन्ति। यथा- तटः तटी, तटम्, अत्र लिङ्गमात्राधिक्येऽर्थे प्रथमा भवति।

**द्रोणो व्रीहिः**

परिमाणमात्रे यत्र प्रथमा भवति, तस्योदाहरणं वर्तते द्रोणो व्रीहिः। अत्र द्रोणशब्दः परिमाणविशेषस्य वाचकः, व्रीहि शब्दश्च धान्यविशेषस्य वाचकः।'द्रोण' इत्यत्र द्रोणपदोत्तर 'सु' प्रत्ययस्यार्थः वर्तते सामान्यपरिमाणः, द्रोणस्यार्थः वर्तते विशेषपरिमाणः। 'सामान्य विशेषयोरभेदान्वयः' अर्थात् सामान्यार्थस्य विशेषार्थस्य च परस्परमभेदान्वयः (अभेद् सम्बन्धः) भवति, इति नियमात् सामान्यपरिमाणे द्रोणरूपार्थविशेषपरिमाणः अभेद सम्बन्धेन विशेषणं वर्तते। एवञ्च द्रोणपदोत्तर सु प्रत्ययस्यार्थः सामान्यपरिमाणः परिच्छेद्य परिच्छेदक भावेन व्रीहौविशेषणम्। एवं द्रोणों व्रीहिः इत्यस्यार्थः वर्तते द्रोणरूप परिमाणविशेषोयः सामान्यपरिमाणः तत्परिच्छिन्नो व्रीहिः।

वचनं संख्या इत्यत्र वचन शब्दस्यार्थः वर्तते संख्या। एकः, दौ, वहवः अत्र उक्तार्थत्वात् विभक्तेरप्राप्तौ वचनग्रहणं कृतम्।

**भाववोधिनी हिन्दी व्याख्या**

कारक किसे कहते हैं इस प्रश्न का उत्तर देते हुये वैयाकरण कहतें है कि -

क्रियाजनकत्वं कारकत्वम्, अथवा क्रियान्वयित्वं कारकत्वम्।

अर्थात् जिसका क्रिया के साथ अन्वय (सम्बन्ध) हो वह कारक कहलाता है।

1. **छात्रः पठति** - इस वाक्य में छात्र का पठन रूप क्रिया से सम्बन्ध होने के कारण छात्रः कर्ता कारक है।
2. **पुष्पं स्पृशति** - इस वाक्य में पुष्प का स्पर्श रूप क्रिया से अन्वय होने के कारण 'पुष्पम्' यह कर्मकारक है।
3. **कलमेन लिखति** - उक्त वाक्य में कलम् पद का लिखति क्रिया से सम्बन्ध है, अतः कलम् करण है।

# अथ द्वितीया विभक्तिः

**3 कारके [ 1-4-23 ] इत्यधिकृत्य।**

**वृत्तिः** अधिकारसूत्रमिदम्।

**सूत्रार्थः** कारके यह अधिकार सूत्र है।

### भावबोधिनी संस्कृत-व्याख्या

'कारके' इत्यत्र कारकशब्दस्यार्थः वर्तते- क्रियाजनकं कारकम्, करोति-क्रियां निवर्तयति सम्पादयति वा इति कारकम्। कारकं हेतुः इति अर्थान्तरम्। कारकं कस्य हेतुः इति प्रश्ने वक्ष्यामः क्रियायाः इति। अतः क्रियान्वयित्वं कारकत्वमिति फलतोऽर्थः। कृ धातोः ण्वुल् प्रत्यये अनुबन्धलोपे 'वु' इत्यस्य स्थाने अकादेशे कृते कारकशब्दः निष्पन्नतां याति। 'कारके' इति अधिकारसूत्रम्। अधिकारत्वञ्च-स्वदेशे वाक्यार्थबोधशून्यत्वे सति उत्तरोत्तरफल-जनकत्वम्।

### भावबोधिनी हिन्दी व्याख्या

'कारके' इस सूत्र में कारक शब्द का अर्थ है क्रिया जनकं कारकम्। करोति अर्थात् जो क्रिया को सम्पन्न करता हो उसे कारक कहते हैं। कारक का दूसरा अर्थ है हेतुः। कारक किसका हेतु है इस प्रश्न का उत्तर है क्रिया का। अतः 'क्रिया जनकत्वं कारकत्वम्' अथवा 'क्रियान्वयित्वं कारकत्वम्' यह कारक का लक्षण है। जो क्रिया का जनक (उत्पादक) हो अथवा जिसका क्रिया से अन्वय (सम्बन्ध) हो वह कारक कहलाता है। जैसे – छात्रः कक्षायां कलमेन पत्रं लिखति। इस वाक्य में क्रिया है लिखति। इस लेखन रूप क्रिया की सिद्धि में छात्र, कक्षा, कलम और पत्र यह सभी सहायक है अतः यह सभी कारक हैं। क्रिया की सिद्धि में छः प्रकार के निमित्तों (कारकों) को स्वीकार करते हुये वैयाकरणों नें कहा है कि –

**कर्ता कर्म च करणञ्च सम्प्रदानं तथैव च।**
**अपादानाधिकरणमित्याहु कारकाणि षट्।।**

कारक शब्द की निष्पत्ति के विषय में सिद्धान्त कौमुदीकार ने कहा है कि 'कृ' धातु से ण्वुल् प्रत्यय का विधान कर अनुवन्ध लोप करने के पश्चात् वु के स्थान पर 'युवोरनाकौ' सूत्र से अकादेश करने के पश्चात कारक शब्द निष्पन्न होता है।

महर्षि पाणिनि द्वारा विरचित छः प्रकार के सूत्रो में से 'कारके' यह अधिकार सूत्र है जिसका लक्षण है– 'स्वदेशे वाक्यार्थबोधशून्यत्वे सति उत्तरोत्तरफलजनकत्वम्', अर्थात् जो सूत्र अपने देश (स्थान) में वाक्यार्थ बोध से रहित होते हुये आगे आने वाले सूत्रों में अपना वाक्यार्थ बोध करावे वह अधिकार सूत्र कहलाता है।

---

**4- कर्तुरीप्सिततमं कर्म [ 1-4-49 ]**

कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्म संज्ञं स्यात्। कुर्तुः किम्? माषेष्वश्वं बध्नाति। कर्मण ईप्सिता माषाः न तु कर्तुः। तमब्ग्रहणं किम्? पयसा ओदनं भुंक्ते। कर्म इत्यनुवृत्तौ पुनः कर्मग्रहणमाधारनिवृत्यर्थम्। अन्यथा गेहं प्रविशतीत्यत्रैव स्यात्।

---

**वृत्तिः** कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्।

**सूत्रार्थः** कर्ता क्रिया के द्वारा जिस पदार्थ (वस्तु) को प्राप्त करने के लिये अत्यधिक चाहता है उसकी कारक संज्ञा होकर कर्म संज्ञा होती है।

**भावबोधिनी संस्कृत - व्याख्या**

'कर्तुः' इत्यस्मिन् पदे 'क्तस्य च वर्तमाने' इति सूत्रेण कर्तरि षष्ठी विभक्ति भवति। धात्वोरर्थः वर्तते फलं क्रिया च। धातवश्च द्विधा भवन्ति सकर्मकाः अकर्मकाश्च। सकर्मक धातोः यदा प्रयोगो भवति, तदा फलम् एकत्र भवति क्रिया च अन्यत्र भवति। फलं यत्र भवति तत् कर्म। अत एव फलाश्रयः कर्म इत्युच्यते। क्रिया यत्र भवति सः कर्ता। अत एव क्रियाश्रयः कर्ता इत्युच्यते। यथा-देवदत्तः तण्डुलं पचति। अत्र पच् धातोरर्थः वर्तते विक्लिति रूपं फलं तदनुकूलक्रिया च। विक्लिति तण्डुले, अतः तण्डुलः कर्म। क्रिया देवदत्ते, अतः देवदत्तः कर्ता। अकर्मक धातोः यदा प्रयोगः भवति तदा फलं क्रिया च कर्तरि एव भवतः। यथा-देवदत्तः हसति। अत्र हस धातोरर्थः हसन् रूप फलं तदनुकूल क्रिया च। एतदुभयमपि कर्तरि देवदत्ते एव वर्तते।

**कर्तुः किम्**

'कर्तुरीप्सिततमं कर्म' इत्यस्मिन् सूत्रे 'कर्तुः' इति पदग्रहणस्य प्रयोजनं किम्? अस्याः शंकायाः समाधानं 'माषेष्वश्वं बध्नाति' अनेन वाक्येन क्रियते। अर्थात् सूत्रे 'कर्तुः' इति

पदस्याभावे माषपदस्यापि कर्म संज्ञा भवितुमर्हति तेन 'माषान् अश्वं बध्नाति' इति अनिष्टं रूपं जायते, तन्माभूदेतदर्थं प्रकृत सूत्रे कर्तुग्रहणमावश्यकम्। कर्तुः च ग्रहणे कृते माष पदस्य कर्मसंज्ञा न भवति यतोहि कर्मणः ईप्सिताः माषाः न तु कर्तुः।

## तमब्ग्रहणं किम्

'कर्तुरीप्सिततमं कर्म' इत्यस्मिन् सूत्रे तमब्ग्रहणं किमर्थमस्य प्रश्नस्योत्तरं उदीरितं 'पयसा ओदनं भुङ्क्ते'। अत्र भोजन कर्तुः भोजन क्रियया ओदनः पयश्च इत्युभयमपि यद्यपि ईप्सितम् , तथापि ईप्सिततमः ओदन एव वर्तते। पयस्तु ओदन भक्षणे सहायकत्वात् करणम् , करणे च तृतीया भवति। अतः तमब्ग्रहणाभावे पयस् शब्दस्यापि कर्म संज्ञा भवितुमर्हति सा मा भूदेतदर्थं तमब्ग्रहणमावश्यकम्। तमब् ग्रहणे कृते ईप्सिततमता ओदने एव वर्तते न तु पयसि। अतः ओदनस्यैव कर्म संज्ञा भविष्यति न तु पयसः।

## कर्मेत्यनुवृत्तावित्यादि

अष्टाध्यायियां 'कर्तुरीप्सिततमं कर्म'[1-4-49] इति सूत्रात् पूर्वं 'अधिशीङ्स्थासां कर्म' [1-4-46] इति सूत्रं वर्तते। 'सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र' इति नियमात् अधिशीङ्स्थासां कर्म इति पूर्व सूत्रात् 'कर्तुरीप्सिततमं कर्म' इत्यस्मिन सूत्रे कर्म इत्यस्यानुवृत्तिः आगमिष्यत्येव पुनः कर्मग्रहणं किमर्थम्? अस्याः शंकायाः समाधानं कुर्वता उदीरितं - यत् पूर्वसूत्रात् कर्म इत्यस्यानुवृत्तौ सत्याम् आधार पदस्यापि अनुवृत्तिः समागच्छेत्, यतोहि 'अधिशीङ् स्थासां कर्म' अनेन सूत्रेण क्रियायाः आधारस्य कर्मसंज्ञा भवति। तेन 'गेहं प्रविशति' इत्यत्र तु कर्तुः प्रवेश क्रियायाः आधारस्य गेहस्य कर्मसंज्ञा भविष्यति, तत् गेहं कर्तुः क्रियया ईप्सिततमपि अस्ति, परं 'यज्ञदत्तः हरिं भजति' इत्यत्र हरि पदस्य कर्म संज्ञा न स्यात् यतोहि भज् क्रियायाः आधारः 'हरिः' इति पदं नास्ति। अतः 'अधिशीङ्स्थासां कर्म' इति सूत्रात् कर्मणा सह आधारस्यापि अनुवृत्तिः माभूदेतदर्थं 'कर्तुरीप्सिततमं कर्म' इत्यस्मिन् सूत्रे कर्मग्रहणमावश्यकम्।

## भावबोधिनी हिन्दी व्याख्या

'कर्तुः' इस पद में 'क्तस्य च वर्तमाने' सूत्र के द्वारा कर्ता अर्थ में षष्ठी विभक्ति का विधान हुआ है। धातुओं के दो अर्थ होते हैं फल और क्रिया। यह धातुयें दो प्रकार की होती हैं सकर्मक और अकर्मक। 'कर्मणः सहिताः सकर्मकाः, कर्मणः रहिताश्चाकर्मकाः' अर्थात् कर्मयुक्त धातुयें सकर्मक तथा कर्म रहित धातुयें अकर्मक कहलाती हैं। सकर्मक धातु का प्रयोग जब होता है तो फल अन्यत्र रहता है तथा क्रिया अन्यत्र रहती है। फल जहाँ होता है वह कर्म कहलाता है, फलाश्रयं कर्म। क्रिया जहाँ होती है वह कर्ता कहलाता है इसलिये कहा गया है कि - क्रियाश्रयः कर्ता। जैसे-देवदत्तः तण्डुलं पचति। इस वाक्य में पच् धातु का अर्थ है विक्लित्ति रूप फल, और उसके अनुकूल क्रिया। विक्लित्ति तण्डुल में रहती है

रूपसिद्धिः

**हरिं भजति -** अत्रोक्तप्रयोगे 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण हरिशब्दस्य कर्म संज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण कर्मसंज्ञकात् हरिशब्दात् द्वितीया विभक्तौ कृतायाम् उक्तं रूपं निष्पन्न भवति।

---

**7- तथायुक्तं चानीप्सितम् [ 1-4-50 ] ईप्सिततमवत क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात्। ग्रामं गच्छंस्तृणं स्पृशति। ओदनं भुञ्जानो विषं भुङ्क्ते।**

---

**वृतिः** ईप्सिततमवत् क्रियया युक्तम् अनीप्सितमपि कारकं कर्मसंज्ञं भवति।

**सूत्रार्थः** ईप्सिततम की क्रिया से युक्त अनीप्सित पदार्थ की भी कारक संज्ञा होकर कर्म संज्ञा होती है।

**भावबोधिनी संस्कृत-व्याख्या**

'तथायुक्तं चानीप्सितम्' इत्यस्मिन् सूत्रे 'कारके' इत्यस्याधिकारः समायाति 'कर्तुरीप्सिततमं कर्म' इति सूत्राच्च 'कर्म' इत्यस्यानुवृत्तिरायाति। तेन प्रकारेण इति विग्रहे तद् शब्दात् थाल् प्रत्ययविहिते सति तथा शब्दः निष्पद्यते। 'अनीप्सितम्' इत्यत्र न ईप्सितम् इत्यस्मिन् विग्रहे नञ् समासे 'नलोपो नञः' इति सूत्रेण नकार लोपे 'तस्मान्नुडचि' इति सूत्रेण नुडागमे सति 'अनीप्सितम्' इति रूपस्य सिद्धिर्जायते।

'ग्रामं गच्छन् तृणं स्पृशति' इत्यादि वाक्येषु स्पृश्यमानस्य तृणस्य ईप्सिततमत्वा भावेऽपि गंगां स्पृशति इत्यादौ स्पृश्यमानस्य ईप्सिततमस्य गंगादेरिव क्रियाजन्यसंयोगात्मक फलाश्रयत्वात् येन प्रकारेण ईप्सिततमं क्रियया युज्यते तेनैव प्रकारेण यदा अनीप्सितं क्रियया युक्तं भवति तदा तस्यापि कर्मसंज्ञा भवति।

**भावबोधिनी हिन्दी - व्याख्या**

'तथायुक्तं चानीप्सितम्' इस सूत्र में 'कारके' सूत्र का अधिकार आ रहा है, तथा 'कर्तुरीप्सितमं कर्म' इस सूत्र से कर्म पद की अनुवृत्ति आ रही है। 'तेन प्रकारेण' इस विग्रह में तद् शब्द से थाल् प्रत्यय होने पर 'तथा' शब्द निष्पन्न होता है। 'अनीप्सितम्' यहाँ न ईप्सितम् इस विग्रह में नञ् समास होने पर 'नलोपो नञः' इस सूत्र के द्वारा नकार लोप होने पर 'तस्मान्नुडचि' सूत्र से नुट् का आगम् होने पर 'अनीप्सितम्' रूप की सिद्धि होती है। इस प्रकार प्रकृत सूत्र का तात्पर्य बताते हुये कहते हैं कि 'ग्रामं गच्छन् तृणं स्पृशति' इत्यादि वाक्यों में स्पृश्यमान तृणं में ईप्सिततमत्व का अभाव होने पर भी 'गंगां स्पृशति' इत्यादि स्थल पर स्पृश्यमान ईप्सिततम गंगादि के समान क्रिया जन्य संयोगात्मक फल का आश्रय होने से जिस प्रकार ईप्सिततम क्रिया से युक्त होता है उसी प्रकार जब

अनीप्सित क्रिया से युक्त होता है तब उस अनीप्सित की भी कर्म संज्ञा होती है।

रूपसिद्धिः

**ग्रामं गच्छन् तृणं स्पृशति** - अत्रोक्तप्रयोगे 'तथायुक्तं चानीप्सितम्' इति सूत्रेण तृण शब्दस्य कर्मसंज्ञायां, 'कर्मणि द्वितीया' इति सूत्रेण कर्मसंज्ञकात् तृणशब्दात् द्वितीया विभक्तौ कृतायाम् उक्तं रूपं निष्पन्नं भवति।

**ओदनं भुञ्जानो विषं भुङ्क्ते** -

अत्र 'तथायुक्तं चानीप्सितम्' इति सूत्रेण विषशब्दस्य कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण कर्मसंज्ञकात् विषशब्दात् द्वितीया विभक्तौ कृतायाम् उक्तरूपस्य सिद्धि र्जायते।

---

**8- अकथितञ्च [ 1-4-51 ]**

**अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्।**

**दुह्याच्पच्दण्ड्रुधि-प्रच्छिचिब्रूशासुजिमथमुषाम्।**
**कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम्।।**

**'दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्ण्णां कर्मणा यद् युज्यते तदेवाकथितं कर्म' इति परिगणनं कर्तव्यम् इत्यर्थः गां दोग्धि पयः। बलिं याचते वसुधाम्। अविनीतं विनयं याचते। तण्डुलान् ओदनं पचति। गर्गाञ्छतं दण्डयति। ब्रजमवरूणद्धि ग्राम्। माणवकं पन्थानं पृच्छति। वृक्षम् अवचिनोति फलानि। माणवकं धर्मं ब्रूते शास्ति वा। शतं जयति देवदत्तम्। सुधां क्षीर निधिं मथ्नाति। देवदत्तं शतं मुष्णाति। ग्राममजां नयति हरति कर्षति वहति वा। अर्थ निबन्धनेयं संज्ञा। बलिं भिक्षते वसुधाम्। माणवकं धर्मं भाषते अभिधत्ते वक्तीत्यादि। कारकं किम्? माणवकस्य पितरं पन्थानं पृच्छति। वा. अकर्मक धातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्।। कुरून स्वपिति। मासमास्ते। गोदोहमास्ते। क्रोशमास्ते।**

---

**वृत्तिः** अपादानाहिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्।

**सूत्रार्थः** अपादानादि विशेष अविवक्षित कारक की कर्म संज्ञा होती है।

**वार्तिकार्थः** अकर्मक धातुओं के योग में देश, काल, भाव, गन्तव्य तथा अध्ववाची शब्दों की कर्मसंज्ञा होती है।

**भावबोधिनी संस्कृत व्याख्या** -

प्रकृतसूत्रे पदद्वयं वर्तते, 'अकथितम्' इति 'च' इति च। न कथितम् इति विग्रहे नञ् समासे विहिते सति अकथितमिति पदस्य निष्पत्तिजार्यते। अकथितमित्यस्यार्थः वर्तते

अप्रधानम्। चकारेण कर्मपदस्यानुवर्तते। 'कारके' इत्यस्याधिकारः वर्तते। अतः अकथितम् (अप्रधानम्) कारकं कर्मसंज्ञकं भवतीति सूत्रार्थः।

वक्ता यदि कस्मिंश्चिद्वाक्ये अपादानादिकारकम् अपादानत्वादिरूपेण वक्तुं नेच्छति, अपितु सम्बन्ध सामान्य रूपेणैव वक्तुम् इच्छति तदा तत् अपादानादिकारकम् अकथितम् (अप्रधानम्) इत्युच्यते। तत् अकथितं कारकं कर्मसंज्ञकं भवति। यदि वक्ता अपादानादिकारकम् अपादानादिरूपेणैव वक्तुम् इच्छति तदा अपादानसंज्ञाऽपि भवितुमर्हति। यथा - 'गां दोग्धि पयः' अस्मिन् वाक्ये गो शब्दे अपादानस्याविवक्षायां कर्मणस्य च विवक्षायां 'अकथितञ्च' इति सूत्रेण गो शब्दस्य कर्मसंज्ञा भवति कर्मसंज्ञकशब्दाच्च 'कर्मणि द्वितीया' इति सूत्रेण द्वितीय विभक्ति भवति। यदि तत्र अपादानस्यैव विवक्षा स्यात्तदा 'गोः पयो दोग्धि' इति वाक्यमपि साधुः।

## दुह्याच् इति

अपादानादि कारकाणां कर्मसंज्ञा सर्वत्रैव न भवति, अपितु दुह्याच्पच्दण्डादि धातूनां प्रधान कर्मणा यत् युज्यते तदेव अकथितम् (अप्रधानम्) कर्म भवति। अत एव मूले उक्तं यत् - दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णाम् अर्थात् कारिकोक्त षोडशधातूनां प्रधान कर्मणा यद् युज्यते तदेव अकथितं कर्म भवतीति। एवं कारिकायां परिगणिताः षोडश धातवः प्रधानकर्मकाः अकथितकर्मकाश्चेति द्विकर्मकाः सन्ति।

## अर्थनिबन्धनेयमिति

'अकथितञ्च' इति सूत्रेण 'दुह्याच्' इति कारिकान्तर्गतानां द्विकर्मणां षोडशधातूनां योगे या कर्मसंज्ञा भवति सा अर्थ निबन्धना न तु स्वरूपनिबन्धना। अर्थः निबन्धनं=मूलं यस्याः सा अर्थ निबन्धना। बलिं भिक्षते वसुधाम् अस्मिन् वाक्ये याच् धातु समानार्थकस्य भिक्ष् धातोः योगेऽपि'अकथितञ्च' इति सूत्रेण बलि इत्यस्य कर्म संज्ञा भवति, अनन्तरं कर्मणि द्वितीया इति सूत्रेण द्वितीया विभक्ति भवति।

## कारकं किमिति

'अकथितञ्च' इति सूत्रेण कारकस्यैव कर्मसंज्ञा कथं भवति अस्याः शंकायाः समाधाने उदीरितम् 'माणवकस्य पितरं पन्थानं पृच्छति' अस्मिन वाक्ये माणवकस्य कर्मसंज्ञा मा भूदेतदर्थं कारकग्रहणमावश्यकम्। 'माणवक' इत्यत्र कारकत्वाभावात् कर्मसंज्ञा न भवति।

## अकर्मकधातुभिः

अकर्मक धातुभिर्योगे देश (स्थान) वाचकस्य, काल वाचकस्य, भाववाचकस्य, गन्तव्य वाचकस्य च कर्म संज्ञा भवतीति वार्तिकार्थः। अस्य वार्तिकस्य 'कुरून् स्वपिति' आदयः सन्ति उदाहरणानि।

समाधान में कहा गया है कि - 'माणवकस्य पितरं पन्थानं पृच्छति' इस वाक्य में 'माणवक' की कर्म संज्ञा न हो इसलिए कारक ग्रहण करना आवश्यक है। माणवक इस पद में कारकत्व का अभाव होने से कर्म संज्ञा नहीं होती।

**अकर्मकधातुभिः**

अकर्मक धातुओं के योग में देशवाची, कालवाची, भाववाची गन्तव्यवाची तथा अध्ववाची शब्दों की कर्म संज्ञा होती है, यह वार्तिक का अर्थ है। 'कुरून् स्वपिति' आदि इस वार्तिक के उदाहरण है।

## रूपसिद्धिः

**गां दोग्धि पयः**

अत्र दुह् धातोः पयः मुख्यं कर्म, तेन युक्तस्य गो शब्दस्य 'अकथितञ्च' इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण कर्म संज्ञकात् गो शब्दात् द्वितीया विभक्तौ कृतायां उक्तरूपस्य सिद्धि जायते।

**बलिं याचते वसुधाम्**

अत्र याच् धातोः मुख्यं कर्म 'वसुधाम्' तेन युक्तस्य बलि शब्दस्य 'अकथितञ्च' इति सूत्रेण कर्म संज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण कर्मसंज्ञकात् बलि शब्दात् द्वितीया विभक्तौ कृतायां उक्त रूपस्य सिद्धि जायते।

**अविनीतं विनयं याचते**

अत्र याच् धातोः मुख्यं कर्म विनयं, तेन युक्तस्य अविनीत् शब्दस्य 'अकथितञ्च' इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण कर्मसंज्ञकात् अविनीत् शब्दात् द्वितीया विभक्तौ कृतायाम् उक्तं रूपं निष्पन्नं भवति।

**तण्डुलान् ओदनं पचति**

अत्र पच् धातोः मुख्यं कर्म ओदनं, तेन युक्तस्य तण्डुलशब्दस्य 'अकथितञ्च' इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तौ कृतायाम् उक्तरूपस्य सिद्धिर्जायते।

**गर्गान् शतं दण्डयति**

अत्र दण्ड् धातोः मुख्यं कर्म शतं, तेन युक्तस्य गर्गशब्दस्य 'अकथितञ्च' इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेणे द्वितीया विभक्तौ कृतायाम् उक्तं रूपं निष्पन्नं भवति।

**व्रजमवरूणद्धि गाम्**

अत्र रूध् धातोः मुख्यं कर्म गाम्, तेन युक्तस्य व्रज शब्दस्य 'अकथितञ्च' इति

सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तौ कृतायाम् उक्तं रूपं निष्पन्नं भवति।

**माणवकं पन्थानं पृच्छति**

अत्र पृच्छ् धातोः मुख्यं कर्म पन्थानं, तेन युक्तस्य माणवकशब्दस्य 'अकथितञ्च' इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तौकृतायाम् उक्तं रूपं निष्पन्नं भवति।

**वृक्षमवचिनोति फलानि**

अस्मिन् वाक्ये 'चि' धातोः मुख्यं कर्म फलानि, तेन युक्तस्य वृक्ष शब्दस्य 'अकथितञ्च' इति सूत्रेण कर्म संज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तौ कृतायाम् उक्त रूपं निष्पन्नं भवति।

**माणवकं धर्मं ब्रूते शास्ति वा**

अस्मिन वाक्ये 'ब्रू' धातोः 'शास्' धातोश्च मुख्यं कर्म धर्मं, तेन युक्तस्य माणवक शब्दस्य 'अकथितञ्च' इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तौ कृतायाम् उक्तं रूपं निष्पन्नं भवति।

**शतं जयति देवदत्तम्**

अत्रे 'जि' धातोः मुख्यं कर्म 'शतं' तेन युक्तस्य देवदत्तशब्दस्य अकथितञ्च' इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तौ कृतायाम् उक्तं रूपं निष्पन्नं भवति।

**सुधां क्षीरनिधिं मथ्नाति**

अत्र मन्थ धातोः मुख्यं कर्म सुधां तेन युक्तस्य क्षीरनिधिशब्दस्य अकथितञ्च इति सूत्रेण कर्मसंज्ञायां कर्मणि द्वितीया इति सूत्रेण द्वितीया विभक्तौ कृतायाम् उक्तं रूपं निषपन्नं भवति।

**देवदत्तं शतं मुष्णाति**

अस्मिन वाक्ये 'मुष्' धातोः मुख्यं कर्म शतं, तेन युक्तस्य देवदत्त शब्दस्य 'अकथितञ्च' इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तौ कृतायाम् उक्तं रूपं निष्पन्नं भवति।

**ग्रामम् अजां नयति हरति कर्षति वहति वा**

अत्र नी ह्री कृष् वह् धातूनां मुख्यं कर्म अजां तेन युक्तस्य ग्राम शब्दस्य 'अकथितञ्च' इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तौ कृतायाम् उक्तं रूपं निष्पन्नं भवति।

**बलिं भिक्षते वसुधाम्**

अत्र 'अकथितञ्च' इति सूत्रेण बलि शब्दस्य कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तौ कृतायाम् उक्तं रूपं निष्पन्नं भवति।

**माणवकं धर्मं भाषते अभिधत्ते वक्ति**

अत्र 'अकथितञ्च' इति सूत्रेण माणवक शब्दस्य कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तौ कृतायाम् उक्तं रूपं निष्पन्नं भवति।

**कुरून् स्वपिति**

अत्र 'अकर्मक धातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञकं इति वाच्यम्' इति वार्तिकेन कुरूशब्दस्य कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण कर्मसंज्ञकात् कुरू शब्दात् द्वितीया विभक्तौ कृतायाम् उक्तं रूपं निष्पन्नं भवति। एवमेव मासमास्ते, गोदोहमास्ते, क्रोशमास्ते, इत्यादि रूपाणां सिद्धि जायते।

---

**9 - गतिबुद्धि प्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ [ 1-4-52 ]**

**गत्याद्यर्थानां शब्दकर्मणामकर्मकाणाञ्च अणौ यः कर्ता स णौ कर्म स्यात्।**

**शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत्।**
**आशयच्चामृतं देवान्वेदमध्यापयद् विधिम्।।**
**आसयत्सलिले पृथ्वीं यः स मे श्री हरिर्गतिः।**

**'गति' इत्यादि किम्? पाचयत्योदनं देवदत्तेन। अण्यन्तानां किम्? गमयति देवदत्तो यज्ञदत्तम्, तमपरः प्रयुङ्क्ते-गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः। वा. नीवह्योर्न।। नाययति वाहयति वा भारं भृत्येन। वा. नियन्तृकर्तकस्य वहेरनिषेधः। वाहयति रथं वाहान् सूतः। वा. आदिखाद्योर्न।। आदयति खादयति वान्नं बटुना। वा. भक्षेरहिंसार्थस्य न। भक्षयत्यन्नं बटुना। अहिंसार्थस्य किं? भक्षयति बलीवर्दान् सस्यम्। वा. जल्पतिप्रभृतीनामुपसंख्यानम्।। जल्पयति भाषयति वा धर्मं पुत्रं देवदत्तः। वा. दृशेश्च।। दर्शयति हरिं भक्तान्। सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणम्, न तु तद्विशेषार्थानाम् इत्यनेन ज्ञाप्यते। तेन स्मरति जिघ्रति इत्यादीनां न। स्मारयति घ्रापयति वा देवदत्तेन। वा. शब्दायतेर्न।। शब्दाययति देवदत्तेन। धात्वर्थसंगृहित कर्मत्वेन अकर्मकत्वात् प्राप्तिः। येषां देशकालादि भिन्नं कर्म न सम्भवति तेऽत्राकर्मकाः, न तु अविवक्षितोकर्माणोऽपि। तेन 'मासम आसयति देवदत्तम्' इत्यादौ कर्मत्वं भवत्येव 'देवदत्तेन पाचयति' इत्यादौ तु न।**

---

वृत्तिः गत्यर्थकानां बुद्ध्यर्थकानां प्रत्यवसानार्थकानां शब्दकर्मकाणाम् अकर्मकाणां च धातूनां अणौ यः कर्ता स णौ कर्म स्यात्।